द्विशफः, पुं, (द्वौ द्वौ शफौ यस्य ।) द्विखुरपशुः । यथा, श्रीभागवते । ३ । १० ।२२ ।
"गौरजो महिषः कृष्णः शूकरो गवयो रुरुः ।
द्विशफाः पशवश्चेमे अविरुष्ट्रश्च सप्तमः ॥"

द्विष, ल न औ वैरे । इति कविकल्पद्रुमः ॥ (अदां-उभं-सकं-अनिट् ।) ल न, द्वेष्टि द्विष्टे । औ, अद्विक्षत् । द्विषन्ति मन्दाश्चरितं महात्मनाम् । इति कुमारः । इति दुर्गादासः ॥

द्विषतीतापः, त्रि, (द्विषतीं तपति तापयतीति वा । द्विषती+तप+खश् । तप+णिच्+अच् वा ।) स्त्रीशत्रुतापकः । इति संक्षिप्त-सारव्याकरणम् ॥

द्विषन्, [त्] त्रि, (द्वेष्टीति । द्विष+"द्विषो-ऽमित्रे ।" ३ । २ । १३१ । इति शतृ ।) शत्रुः । इत्यमरः ।२।८।१० ॥ (यथा, माघे । २ । १ ।
"यियक्षमाणेनाहूतः पार्थेनाथ द्विषन् मुरम् ॥")

द्विषन्तपः, त्रि,(द्विषन्तं तापयतीति । तप+णिच्+"द्विषत्परयोस्तापेः ।" ३ । २ । ३९ । इति खच् । "खचि ह्रस्वः ।" ६ । ४ । ९४ । इति ह्रस्वः । "अरुर्द्विषदजन्तस्य मुम् ।" ६ । ३।६७। इति मुम् । ततः संयोगान्ततकारलोपः ।) शत्रुन्तपः । शत्रुतापजनकः । इति संक्षिप्तसार-व्याकरणम् ॥

द्विष्टं, क्ली, (द्विष+क्तः ।) ताम्रम् । ताम्रम् । इत्यमरटीकासारसुन्दरी ॥ द्वेषविषये, त्रि । (यथा, भाषापरिच्छेदे । १५१ ।
"निवृत्तिस्तु भवेद्द्वेषात् द्विष्टसाधनताधियः ॥"
तथाच ।
"अपोढं दुष्टमुच्छिष्टं पाषाणतृणलोष्टवत् ।
द्विष्टं शुषितमस्वादु पूति चान्नं विवर्ज्जयेत् ॥"
इति सुश्रुते सूत्रस्थाने ४६ अः ॥

द्विष्ठः, त्रि, द्वयोस्तिष्ठति यः । (द्वि+स्था+कः ।) उभयस्थः । यथा । संयोगस्य द्विष्ठतयेति जग-दीशः ॥

द्विसप्ततिः, स्त्री, (द्व्यधिका सप्ततिः । "विभाषा चत्वारिंशत्प्रभृतौ सर्व्वेषाम् ।" ६ । ३ । ४९ । इति पक्षे न आत्वम् ।) द्व्यधिकसप्ततिः । इति ज्योतिषम् ॥ ७२ बाओयात्तर इति भाषा ॥ (यथा, मनुसंहितायाम् । ७ । १५७ ।
"प्रत्येकं कथिता ह्येताः संक्षेपेण द्विसप्ततिः ॥")

द्विसहस्राक्षः, पुं, (द्विसहस्रं अक्षीणि यस्य । षच् समासे ।) अनन्तदेवः । इति हेमचन्द्रः ॥

द्विसीत्यं, त्रि, (द्विवारं सीतया सहितम् । द्विसीता+"नौ वयोधर्म्मेति ।"४ । ४ ।९१ । इति यत् ।) वारद्वयकृष्टक्षेत्रम् । दोचषा भूँइ इति भाषा । तत्पर्य्यायः । द्विगुणाकृतम् २ द्वितीयाकृतम् ३ शम्बाकृतम् ४ सम्बाकृतम् ५ द्विहल्यम् ६ । इत्यमरभरतौ ॥

द्विस्विन्नान्नं, क्ली, (द्विस्विन्नं द्विःपक्वं अन्नं तण्डुलम् ।) द्विःसिद्धतण्डुलम् । यथा,—
"द्विस्विन्नमन्नं पृथुकं शुष्कं देशविशेषके ।
नात्यन्तशस्तं विप्राणां भक्षणे च निवेदने ॥
अभक्ष्यञ्च यतीनाञ्च विधवाब्रह्मचारिणाम् ।
ताम्बूलञ्च यथा ब्रह्मन् ! तथैते वस्तुनी ध्रुवम् ॥"
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डम् ॥

द्विहल्यं, त्रि, (द्विवारं हलेन कृष्टम् । द्विहल+"मतजनहलादिति ।" ४ । ४ ।९७। इति यत् ।) द्विधाकृष्टक्षेत्रम् । इत्यमरः । २ । ९ । ९ ॥

द्विहा, [न्] पुं, (द्वाभ्यां शुण्डदन्ताभ्यां हन्तीति । हन+क्विप् ।) हस्ती । इति शब्दरत्नावली ॥

द्विहायनी, स्त्री, (द्वौ हायनौ वत्सरौ वयःक्रमौ यस्याः ।"दामहायनान्ताच्च ।" ४।१।२७ । इति ङीप् ।) द्विवर्षा गौः । इत्यमरः । २ । ९ । ६८ ॥ (द्विवर्षवयस्के,, त्रि । यथा, मनुः । ११।१३४ ।
"शुके द्विहायनं वत्सं क्रौञ्चं हत्वा त्रिहायनम् ॥")

द्वीन्द्रियग्राह्यः, पुं, (द्वाभ्यामिन्द्रियाभ्यां ग्राह्यः ।) इन्द्रियद्वयग्रहणीयगुणः । स तु संख्यादिसप्त-द्रवत्वस्नेहस्वरूपः । यथा,—
"संख्यादिरपरत्वान्तो द्रवत्वं स्नेह एव च ।
एते तु द्वीन्द्रियग्राह्या अथ स्पर्शान्तशब्दकाः ॥"
इति भाषापरिच्छेदः ॥

द्वीपं, क्ली, (द्वौ वर्णौ ईयते इति । इ गतौ+बाहु-लकात् पः ।) व्याघ्रचर्म्म । इति द्वीपिशब्द-टीकायां भरतः ॥

द्वीपः, पुं क्ली, (द्विर्गता द्वयोर्दिशोर्वा गता आपो यत्र । काकाक्षिगोलकन्यायेन द्वयोरित्युक्तेऽपि चतुर्दिक्षु इति सिद्धिः ।"ऋक्पूरब्धूरिति ।"५।४। ७४ । इति अत् । "द्व्यन्तरुपसर्गेभ्योऽप ईत् ।" ६।३।९७ । इति ईत् ।) वारिमध्यतटम् । जल-वेष्टितभूमिः । तत्पर्य्यायः । अन्तरीपम्२ । इत्य-मरः ।१।१०।८॥ द्वीपोत्पत्तिर्यथा । सूर्य्यः सुमेरुं प्रदक्षिणीकुर्व्वन् अर्द्धां पृथ्वीं प्रकाशयति अर्द्धां तमसा आवृणोति । तदा भगवदुपासनोपचि-तातिक्रान्तपुरुषप्रभावः प्रियव्रतो राजा सूर्य्य-रथसमवेगेन ज्योतिर्मयरथेन रजनीमपि दिनं करिष्यामीति प्रतिज्ञां कृत्वा सप्तवारं द्वितीय-सूर्य्य इव सूर्य्यमनुपर्य्यक्रामत् । अस्य रथचरण-नेमिपरिखाताः सप्तसिन्धव आसन् । यैरेव सिन्धुभिः पृथिव्याः सप्त द्वीपाः कृताः । ते जम्बु १ प्लक्ष २ शाल्मलि ३ कुश ४ क्रौञ्च ५ शाक ६ पुष्कर ७ संज्ञकाः । तेषां पूर्व्वस्य यद्विस्तार-मानं उत्तरतस्ततो द्विगुणेन विस्तारमानेन परिमाणम् । ते सिन्धुभ्यो बहिःसमं रचिताः । यथा सिन्धुभ्यो बहिरेकैकशो द्वीपाः एवं द्वीपा-नामपि बहिःसिन्धवः । स प्रियव्रतः बर्हिष्मती-गर्भजानगुगतानात्मजान् आग्नीध्रेध्मजिह्वयज्ञ-बाहुहिरण्यरेतोघृतपृष्ठमेधातिथिवीतिहोत्रसं-ज्ञकान् यथासंख्येन एकैकस्मिन् द्वीपे एकैक-मधिपतिं विदधे । इति श्रीभागवतीयपञ्चम-स्कन्धात् संगृहीतम् ॥ * ॥
अपि च ।
"मनोः स्वायम्भुवस्यासन् दश पुत्रास्तु तत्समाः ।
यैरियं पृथिवी सर्व्वा सप्तद्वीपा सपत्तना ॥
ससमुद्राकरवती प्रतिवर्षं निवेशिता ।
स्वायम्भुवेऽन्तरे पूर्व्वमाद्ये त्रेतायुगे तदा ॥
प्रियव्रतस्य पुत्रैस्तैः पौत्रैः स्वायम्भुवस्य तु ।
प्रियव्रतात् प्रजावन्तो वीरात् काम्याव्यजायत ॥
कन्या सा तु महाभागा कर्द्दमस्य प्रजापतेः ।
कन्ये द्वे दशपुत्राश्च सम्राट् कुक्षिश्च ते उभे ॥
मेधाग्निबाहुमित्रास्तु त्रयो योगपरायणाः ।
जातिस्मरा महाभागा न राज्याय मनो दधुः ॥
प्रियव्रतोऽभ्यषिञ्चत्तान् सप्त सप्तसु पार्थिवान् ।
द्वीपेषु तेषु धर्म्मेण द्वीपांस्तांश्च निबोध मे ॥
जम्बुद्वीपे तथाग्नीध्रं राजानं कृतवान् पिता ।
प्लक्षद्वीपेश्वरस्यापि तेन मेधातिथिः कृतः ॥
शाल्मले तु वपुष्मन्तं ज्योतिष्मन्तं कुशाह्वये ।
क्रौञ्चद्वीपे द्युतिमन्तं हव्यं शाकाह्वये सुतम् ॥
पुष्कराधिपतिञ्चैव सवनं कृतवान् सुतम् ॥"
इति मार्कण्डेयपुराणम् ॥

"भूमेरर्द्धं क्षारसिन्धोरुदक्स्थं
जम्बुद्वीपं प्राहुराचार्य्यवर्य्याः ।
अर्द्धेऽन्यस्मिन् द्वीपषट्कस्य याम्ये
क्षारक्षीराद्यम्बुधीनां निवेशः ॥
शाकं ततः शाल्मलमत्र कौशं
क्रौञ्चञ्च गोमेदकपुष्करे च ।
द्वयोर्द्वयोरन्तरमेकमेकं
समुद्रयोर्द्वीपमुदाहरन्ति ॥"
इति सिद्धान्तशिरोमणिः ॥

द्वीपकर्पूरजः, पुं, (द्वीपकर्पूरवत् जायते इति । जन+डः ।) चीनकर्पूरः । इति राजनिर्घण्टः ॥

द्वीपखर्ज्जूरं, क्ली, (द्वीपजातम् खर्ज्जूरम् ।) महा-पारेवतम् । इति राजनिर्घण्टः ॥

द्वीपजं, क्ली, (द्वीपात् जायते इति । जन+डः ।) महापारेवतम् । इति राजनिर्घण्टः ॥

द्वीपवती, स्त्री, (द्वीपः अस्त्यस्या इति । द्वीप+मतुप् मस्य वः । ङीप् ।) नदी । (यथा, महा-भारते । १ । ७० । २८ ।
"अलङ्कृतं द्वीपवत्या मालिन्या रम्यतीरया ॥")
भूमिः । इति मेदिनी । ते, १९८ ॥

द्वीपवान्, [त्] पुं, (द्वीपोऽस्त्यस्य इति । द्वीप+मतुप् मस्य वः ।) समुद्रः । नदः । इति मेदिनी । ते, १९८ ॥

द्वीपशत्रुः, पुं, (द्वीपस्य द्वीपिनः शत्रुः ।) शतावरी । इति राजनिर्घण्टः ॥ (शतमूलीशब्देऽस्य विव-रणं ज्ञातव्यम् ॥)

द्वीपिका, स्त्री, (द्वीपो द्वीपी नाशतया अस्त्यस्या इति । द्वीप+ठन् ।) शतावरी । इति राज-निर्घण्टः ॥

द्वीपिनखः,पुं,(द्वीपिनो व्याघ्रस्य नखः ।) व्याघ्रनखः । इति राजनिर्घण्टः ॥ (स तु बालानां कण्ठभूषण-विशेषः । यथा, अध्यात्मरामायणे ।१।३।४८ ।
"कण्ठे लग्नमणिव्रातमध्यद्वीपिनखाञ्चितम् ॥")

द्वीपिशत्रुः, पुं, (द्वीपिनो व्याघ्रस्य शत्रुः ।) शत-मूली । इति जटाधरः ॥

द्वीपी, [न्] पुं, (द्वीपं चर्म्म अस्त्यस्येति । द्वीप+"अत इति ठनौ ।" ५।२।११५ । इति ठन् ।)